॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय १०२

क्रुद्धमाज्ञाय राम तु वसिष्ठः प्रत्युवाच ह ।
जाबालिरपि जानीते लोकस्यास्य गतागतिम् ।
निवर्तयितु कामस्तु त्वामेतद्वाक्यमब्रवीत् ॥ १॥

इमां लोकसमुत्पत्तिं लोकनाथ निबोध मे ।
सर्वं सलिलमेवासीत्पृथिवी यत्र निर्मिता ।
ततः समभवद्ब्रह्मा स्वयम्भूर्दैवतैः सह ॥ २॥

स वराहस्ततो भूत्वा प्रोज्जहार वसुन्धराम् ।
असृजच्च जगत्सर्वं सह पुत्रैः कृतात्मभिः ॥ ३॥

आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।
तस्मान्मरीचिः सञ्ज्ञज्ञे मरीचेः कश्यपः सुतः ॥ ४॥

विवस्वान्कश्यपाज्जज्ञे मनुर्वैवस्तवः स्मृतः ।
स तु प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ॥ ५॥

यस्येयं प्रथमं दत्ता समृद्धा मनुना मही ।
तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ ६॥

इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरेवेति विश्रुतः ।
कुक्षेरथात्मजो वीरो विकुक्षिरुदपद्यत ॥ ७॥

विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् ।
बाणस्य तु महाबाहुरनरण्यो महायशाः ॥ ८॥

नाना वृष्टिर्बभूवास्मिन्न दुर्भिक्षं सतां वरे ।
अनरण्ये महाराजे तस्करो वापि कश् चन ॥ ९॥

अनरण्यान्महाबाहुः पृथू राजा बभूव ह ।
तस्मात्पृथोर्महाराजस्त्रिशङ्कुरुदपद्यत ।
स सत्यवचनाद्वीरः सशरीरो दिवं गतः ॥ १०॥

त्रिशङ्कोरभवत्सूनुर्धुन्धुमारो महायशाः ।
धुन्धुमारान्महातेजा युवनाश्वो व्यजायत ॥ ११॥

युवनाश्व सुतः श्रीमान्मान्धाता समपद्यत ।
मान्धातुस्तु महातेजाः सुसन्धिरुदपद्यत ॥ १२॥

सुसन्धेरपि पुत्रौ द्वौ ध्रुवसन्धिः प्रसेनजित् ।
यशस्वी ध्रुवसन्धेस्तु भरतो रिपुसूदनः ॥ १३॥

भरतात्तु महाबाहोरसितो नाम जायत ।
यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ।
हैहयास्तालजङ्घाश्च शूराश्च शशबिन्दवः ॥ १४॥

तांस्तु सर्वान्प्रतिव्यूह्य युद्धे राजा प्रवासितः ।
स च शैलवरे रम्ये बभूवाभिरतो मुनिः ।
द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः ॥ १५॥

भार्गवञ्च्यवनो नाम हिमवन्तमुपाश्रितः ।
तमृषिं समुपागम्य कालिन्दी त्वभ्यवादयत् ॥ १६॥

स तामभ्यवदद्विप्रो वरेप्सुं पुत्रजन्मनि ।
ततः सा गृहमागम्य देवी पुत्रं व्यजायत ॥ १७॥

सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ।
गरेण सह तेनैव जातः स सगरोऽभवत् ॥ १८॥

स राजा सगरो नाम यः समुद्रमखानयत् ।
इष्ट्वा पर्वणि वेगेन त्रासयन्तमिमाः प्रजाः ॥ १९॥

असमञ्जस्तु पुत्रोऽभूत्सगरस्येति नः श्रुतम् ।
जीवन्नेव स पित्रा तु निरस्तः पापकर्मकृत् ॥ २०॥

अंशुमानिति पुत्रोऽभूदसमञ्जस्य वीर्यवान् ।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः ॥ २१॥

भगीरथात्ककुत्स्थस्तु काकुत्स्था येन तु स्मृताः ।
ककुत्स्थस्य तु पुत्रोऽभूद्रघुर्येन तु राघवः ॥ २२॥

रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ।
कल्माषपादः सौदास इत्येवं प्रथितो भुवि ॥ २३॥

कल्माषपादपुत्रोऽभूच्छङ्खणस्त्विति विश्रुतः ।

यस्तु तद्वीर्यमासाद्य सहसेनो व्यनीनशत् ॥ २४ ॥

शङ्खणस्य तु पुत्रोऽभूच्छूरः श्रीमान्सुदर्शनः ।
सुदर्शनस्याग्निवर्ण अग्निवर्षस्य शीघ्रगः ॥ २५ ॥

शीघ्रगस्य मरुः पुत्रो मरोः पुत्रः प्रशुश्रुकः ।
प्रशुश्रुकस्य पुत्रोऽभूदम्बरीषो महाद्युतिः ॥ २६ ॥

अम्बरीषस्य पुत्रोऽभून्नहुषः सत्यविक्रमः ।
नहुषस्य च नाभागः पुत्रः परमधार्मिकः ॥ २७ ॥

अजश्च सुव्रतश्चैव नाभागस्य सुतावुभौ ।
अजस्य चैव धर्मात्मा राजा दशरथः सुतः ॥ २८ ॥

तस्य ज्येष्ठोऽसि दायादो राम इत्यभिविश्रुतः ।
तद्गृहाण स्वकं राज्यमवेक्षस्व जगन्नृप ॥ २९ ॥

इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः ।
पूर्वजेनावरः पुत्रो ज्येष्ठो राज्येऽभिषिच्यते ॥ ३० ॥

स राघवाणां कुलधर्ममात्मनः
सनातनं नाद्य विहातुमर्हसि ।
प्रभूतरत्नामनुशाधि मेदिनीं
प्रभूतराष्ट्रां पितृवन्महायशाः ॥ ३१ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com